"नान्तर्भावितसत्त्वञ्चेत्कारणं तद सत्ततः ।"

तथाह्यन्तर्भूतसत्त्वे यदि कारणत्वं तदा स्वविशिष्टे स्वदृत्तिरसतः स्वाश्रयत्वमापादयति । विशिष्टस्यार्थान्तरत्वेऽपि च स्वस्मिन् स्वदृत्तिव्यतिरेकवत् स्वविशिष्टे स्वदृत्तिव्यतिरेके नियमदर्शनात् न सैव सत्ता तस्मिन्निति अन्यस्यास्तस्याविशिष्टदृत्त्यभ्युपगमे तामसन्निवेश्य कारणत्वमभ्युपगन्तुः सर्व्वथैव कारणमसत्पर्य्यवस्यति । अपरापरसत्तानिवेशने वा पर्य्यवसानमेव । न च सत्ताभेदानन्त्यमस्त्वेवेत्यपि पादप्रसारिका निस्ताराय, सत्ताभेदे हि सद्बुद्धिव्यवहारानुगमननिबन्धनलब्धिनः प्रथमापि सत्ता न स्यादिति । सत्त्वदृद्धिमिष्टवतो मूलमपि ते नष्टमिति कष्टतरम् । न च स्वरूपसत्तोपगमाय स्वस्ति भिन्नानप्यनुगतबुद्ध्याद्याधानपदेऽभिषिञ्चता त्वया जातिमात्राय जलाञ्जलिर्वितीर्य्येत । माभूदनुगतिः स्वरूपसत्त्वस्येति च वदन् तद्धर्म्मिणीं कारणतां कथमनुगमयितासीति । किञ्च स्वरूपसत्त्वं स्वरूपात् घटाद्यात्मनो नाधिकमसतोपि स्वरूपं स्वरूपमेव न ह्यसन् घटादिर्न घटादिः तथा सति घटादिर्नेत्यपि न स्यात् असतोऽघटादित्वात् । अथ सदपि सत्तामनन्तर्भाव्य कारणं तदानीमसदपि तत्तथास्तु सत्तासत्तयोः कारणकोट्यप्रवेशाविशेषात् । अथ न सत्ता कारणकोटिनिविष्टा किन्तु कारणत्वं सत्त्वं नियतपूर्व्वसत्तां हि कारणतामन्यदिति मन्यसे, तर्हि मत्पक्षे सैव कारणतास्तु तर्हि कारणसत्तामभ्युपगतवानसीति घट्टकुट्यां प्रभातमिति चेन्न भावानवबोधात् सत्तामसतीमभ्युपगच्छतापि सत्ता मयाभ्युपगतैव । अन्यथा कासावसतीति त्वमपि किं सत्तान्तरसत्तामन्तर्भाव्य कारणत्वमिच्छसि । नत्वेवं पूर्व्ववत् क्वापि सत्तात्यागो वा अनवस्थायां पर्य्यवसानं स्यात् । असत्त्वाऽविशेषात् कारणनियमः कथं स्यादिति चेन्न सत्ताविशेषेऽपि तुल्यत्वात् । सत्त्वेऽस्त्यन्वयाद्यनुविधानं तस्य तज्जातीयस्य वा त्वत्पक्षे त्वसत्त्वाविशेषात् व्यतिरेकः परं सोऽप्यनियतो यदा कारणाभावस्तदा कार्य्याभावावश्यम्भावानभ्युपगमात् नित्यासतः कारणस्यासत्त्वएव कदाचित्कार्य्योत्पादात् । अन्वयस्तु न कदाचिदपीति चेन्न तुल्यत्वात् अन्वयो नास्तीत्यभ्युपगच्छतापि अन्वयोपगमात् अन्वयस्यापि सत्तान्तर्भावने कथितदोषापत्तेः । एतेन

"आशामोदकतृप्ता ये ये चोपार्ज्जितमोदकाः ।
रसवीर्य्यविपाकादि तेषां तुल्यं प्रसज्यते" ॥

इत्यस्यापि बाधकत्वमाशामोदकायते । सत्तान्तर्भावानन्तर्भावाभ्यां प्रत्यादेशात् आशामोदकादिनापि च रसवीर्य्यविपाकादिजननात् । तदसत्कथं कार्य्यं स्यादिति चेन्न सत्तामन्तर्भाव्य कार्य्यत्वोपगमे कारणवत्कार्य्येऽपि उक्तदोषस्यानन्तर्भावे वाऽविशेषस्य पूर्व्ववदावृत्तेः तस्मात् ।

"पूर्व्वं सम्बन्धनियमे हेतुत्वे तुल्यएव नौ ।"
"हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा ।"

आस्तां प्रतिवन्दिग्रहग्रहः कथं पुनरसतः कारणत्वमवसेयं प्राक्सत्त्वनियमस्य विशेषस्यानभ्युपगमात् असत्त्वस्य चाविशेषादिति चेन्न इदमस्मान्नियतं प्राक्सदितिबुद्ध्याविशेषात् । भ्रान्त्यैवंबुद्धिगोचरेऽतिप्रसङ्ग इति चेन्न यादृश्या हि धिया त्रिचतुरकक्षाबाधानवरोधविश्रान्तया वस्तुसत्त्वनिश्चयस्ते, तादृश्यैव विषयीकृतस्य ममापि कारणतानिश्चयः । केवलन्ततः परास्वपि कक्षासु बाधात् पूर्व्वपूर्व्वभ्रान्तिसम्भवेन न तावता सत्त्वावधारणं वयं मन्यामह इति विशेषः । परदर्शनसिद्धान्तस्य भूरिकक्षाधाविनोऽपि ततः परकक्षाबाध्यमानत्वेनातथाभावोपगमात् अन्यथैकदर्शनपरिशेषः स्यात् । एतेन सत्त्वाविशेषात् कथं कस्यचित् पक्षस्य त्रिचतुरकक्षाधावित्वमास्तामित्यपि निरस्तम् । अनेवंबुद्धिविषयतादशायां कोविशेष इति चेत् यदा कदापि तादृशबुद्धिविषयतैव । अन्यथा कथय कथमन्यदा तादृशबुद्धिविषयतया अन्यदा सत्त्वं स्यात् । तदा सत्त्वमन्यदास्थेन व्यवह्रियत इति चेत् अन्यकालिकमेव तर्हि तत्तदातनकारणत्वोपयोगीति समानम् तदेतत् संवित्तिसत्त्वमिति गीयते असती सा न विशेषिका सती सा नेष्टेत्यभिसन्धानेन द्वैतापत्तेरिति संवित्तिरपि सती न वेति पृच्छन् प्रतिवक्तव्यः ज्ञानं तावद्व्यवहारोपपादकतया द्वाभ्यामप्यनुमतं तस्यापि जिज्ञासायां त्रिचतुरकक्षाविश्रान्तगवेषणस्य यदि सत्तोपपन्ना भविष्यति तदा सत्ता, तेनेदमुपपादितम्भविष्यति । अथासत्ता तस्य पर्य्यवस्यति तदा असत्त्वैव तेनेदमुपपाद्यत इति स्वीकर्त्तव्य भ्रमविषयेणेव भ्रमे विशिष्टतावव्यवहारः । अविचार्य्यैव तावत्तस्य सदसत्त्वं विचार आरब्धव्यः । अन्यथा प्रथममेव मतिकर्द्दमे कथारम्भणमशक्यमापद्येत । स्वीकृतञ्च भवतापि भविष्यदादिविषये विज्ञाने विशिष्टव्यवहारनिदानत्वमसतो विषयस्य, कारणशक्तेस्तु विशेषकमसदेव कार्य्यम् । न च कालान्तरसम्बन्धिनी सत्ता तस्या एकत्रान्यत्र नान्यदापीति वैधर्म्यमेतयोरपीति वक्तव्यम् विशिष्टव्यवहारप्रवृत्तिसमये द्वयोरप्यसत्ताऽविशेषात्